पौरूषश्चेति न काप्यनुपपत्तिः । तत्प्रपञ्चस्तु तत्र तत्र द्रष्टव्य इति ।

अथ दत्तकविभागः । तत्र बृहस्पतिः “एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः । शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम्” । शेषाणां ये तत्रांशभागित्वेन निषिद्धास्तेषाम् । आनृशंस्यं दया । प्रजीवनं भरणम् । तथा यमः “पुत्रास्तु द्वादश प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः । तेषां षड्बन्धुदायादाः षड़दायादबान्धवाः । स्वयमुत्पादितस्त्वेको द्वितीयः क्षेत्रजः स्मृतः । तृतीयः पुत्रिकापुत्रो जातिधर्मविदो विदुः । पौनर्भवश्चतुर्थस्तु कानीनः पञ्चमः स्मृतः । गृहे च गूढ़ उत्पन्नः षड़ेते पिण्डदायिनः । अपविद्धः सहोढ़श्च दत्तः कृत्रिम एव च । क्रीतश्च पञ्चमः पुत्रो यश्चोपनयते स्वयम् । इत्येते सङ्करोत्पन्नाः षड़दायादबान्धवाः” नारदः । “औरसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च । कानीनश्च सहोढ़श्च गूढ़ोत्पन्नस्तथैव च । पौनर्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा । स्वयं चोपागतः पुत्रा द्वादशैते प्रकीर्त्तिताः । तेषां षड्बन्धुदायादाः षड़दायादबान्धवाः । पूर्वः पूर्वः स्मृतो ज्येष्ठो जघन्यो यो य उत्तरः । क्रमादेते प्रवर्त्तन्ते मृते पितरि तद्धने । ज्यायसो ज्यायसोऽभावे जघन्यो यो य आप्नुयात्” । पूर्वपूर्वाभावे उत्तरोत्तरेषां द्रविणार्हत्वमित्यर्थः । औरसक्षेत्रजपुत्रिकापुत्रपौनर्भवकानीनगूढ़ोत्पन्नसहोढजदत्तकक्रीतस्वयमुपागतापविद्धयत्रक्वचनोत्पादितानभिधाय विष्णुः “तेषां पूर्वः पूर्वः श्रेयान् स एव दायहरः स चान्यान् बिभृयात्” । औरसपुत्रिकापुत्रक्षेत्रजगूढ़जकानीनपौनर्भवदत्तकक्रीतकृत्रिमस्वयंदत्तसहोढ़ापविद्धानभिधाय याज्ञवल्क्यः “पिण्डदोऽंशहरश्चैषां पूर्वाभावे परः परः ।” मनुः “न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः” तथा “श्रेयसः श्रेयसोऽभावे यवीयान्दक्षयमर्हति । बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः” । सदृशा गुणेन औरसत्वक्षेत्रजत्वाद्युपाधिना वा । श्रेयस औरसादेः । यवीयान् न्यूनः क्षेत्रजादिरित्यर्थः । तथा “औरसक्षेत्रजौ पुत्रौ पितृरिक्थस्य भागिनौ । दशापरे च क्रमशः पितृरिक्थांशभागिनः” । दश दत्तकादयः । हारीतः “स्वयमुत्पादितः क्षेत्रजः पौनर्भवः कानीनः पुत्रिकापुत्रो गूढ़ोत्पन्नश्चेति बन्धुदायादाः, दत्तः क्रीतोऽपविद्धः सहोढ़जः स्वयमुपागतः सहसादृष्टश्चेत्यबन्धुदायादाः” ।

मनुः “पुत्त्रान् द्वादश यानाह नृणां स्वायम्भुवो मनुः । तेषां षट् बन्धुदायादाः षड़दायादबान्धवाः । औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च । गूढ़ोत्पन्नोऽपविद्धश्च दायादबान्धवास्तु षट् । कानीनश्च सहोढ़श्च क्रीतः पौनर्भवस्तथा । स्वयंदत्तश्च शौद्रश्च षड़दायादबान्धवाः” । बौधायनः “औरसं पुत्रिकापुत्रं क्षेत्रजं दत्तकृत्रिमौ । गूढ़ञ्चैवापविद्धञ्च रिक्थभाजः प्रचक्षते । कानीनञ्च सहोढ़ञ्च क्रीतं पौनर्भवं तथा । स्वयंदत्तं निषादञ्च गोत्रभाजः प्रचक्षते” । एतच्च कानीनादीनां गोत्रमात्रभागित्वकथनमौरसादीनां मध्ये कस्यापि सम्भवेऽंशहरत्वप्रतिषेधार्थम् । सहोढ़दत्तकक्रीतस्वयमुपागतापविद्धशौद्रानभिधाय औरसादीन् पराम्रृश्य पुनर्वशिष्ठः “यस्य तु सर्वेषां वर्णानां न कश्चित् दायादः स्यादेते तस्य भागं हरेयुः” । औरसपुत्रिकापुत्रक्षेत्रजकानीनगूढ़ोत्पन्नापविद्धसहोढ़पौनर्भवदत्तकस्वयमुपागतकृतकक्रीतानभिधाय देवलः “एते द्वादश पुत्रास्तु सन्तत्यर्थमुदाहृताः । आत्मजाः परजाश्चैव लब्धा यादृच्छिकास्तथा । तेषां षड्बन्धुदायादाः पूर्वेऽन्ये पितुरेव षट् । विशेषश्चापि पुत्राणामानुपूर्व्या विशिष्यते । सर्वे ह्यनौरसस्यैते पुत्रा दायहराः स्मृताः । औरसे पुनरुत्पन्ने तेषु ज्यैष्ठ्यं न विद्यते । तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः । हीनास्तमुपजीवेयुर्ग्रासाच्छादनसम्भृताः” कात्यायनः, “उत्पन्ने त्वौरसे पुत्रे तृतीयांशहराः स्मृताः । सवर्णा असवर्णास्तु ग्रासाच्छादनभागिनः” । “चतुर्थांशहराः स्मृताः” इति द्वितीयचरणे क्वचित् पाठः । वशिष्ठः, “तस्मिंश्चेत् प्रतिगृहीते औरस उत्पद्यते स चतुर्थभागभागी यदि नाभ्युदयिकेषु प्रयुक्तं स्यात्” । स प्रतिगृहीतपुत्रः आभ्युदयिकेषु यज्ञादिषु यदि औरसेन प्रयुक्तं न स्यात् प्रभूतं धनमिति शेषः । अत्र नानाविधमुनिवचनानां परस्परविरोधपरिहारार्थमेवं व्याख्यायते बृहस्पतिवचने औरसमात्रस्य धनभागित्वकथनमन्येषां भरणमात्रकथनञ्च असवर्णक्षेत्रजदत्तकादिविषयं, देवलकात्यायनवचनैकवाक्यत्वात् । नारदादिवचनेषु च औरसाद्यभावे क्षेत्रजदत्तकादीनामृक्थग्रहणविधिरपि सर्वधनग्रहणविषयः । अतश्च दत्तकग्रहणानन्तरमौरसोत्पत्तौ तदौरसचतुर्थांशविधिर्वशिष्ठोक्तो दत्तकविषये ज्ञेयः । तथा देवलकात्यायनवचने तृतीयांशग्रहणविधिरत्युत्कृष्टगुणदत्तकविषयो वाच्यः । “उपपन्नो गुणैः सर्वैः पुत्रो